# alabhya shrIgAyatrIkavacham

# અલભ્ય શ્રીગાયત્રીકવચમ્

## Document Information

Text title : gAyatrIkavacham 2 alabhyam (kavachasahitA chatuShpAdagAyatrI)

File name : gAyatrIkavachaalabhya.itx

Category : devii, gAyatrI, devI, kavacha

Location : doc_devii

Transliterated by : aspundir Singh

Proofread by : PSA Easwaran

Latest update : June 23, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2022

*sanskritdocuments.org*

# અલભ્ય શ્રીગાયત્રીકવચમ્

વિનિયોગઃ -
ૐ અસ્ય શ્રીગાયત્રીકવચસ્ય બ્રહ્માવિષ્ણુરુદ્રાઃ ઋષયઃ ।
ઋગ્યજુઃસામાથર્વાણિ છન્દાંસિ । પરબ્રહ્મસ્વરૂપિણી ગાયત્રી દેવતા ।
ભૂઃ બીજમ્ । ભુવઃ શક્તિઃ । સ્વઃ કીલકમ્ । var સુવઃ કીલકમ્ ।
ચતુર્વિંશત્યક્ષરા શ્રીગાયત્રીપ્રીત્યર્થે જપે વિનિયોગઃ ।

ધ્યાનમ્ -
વસ્ત્રાભાં કુણ્ડિકાં હસ્તાં, શુદ્ધનિર્મલજ્યોતિષીમ્ ।
સર્વતત્ત્વમયીં વન્દે, ગાયત્રીં વેદમાતરમ્ ॥

મુક્તાવિદ્રુમહેમનીલધવલૈશ્છાયૈઃ મુખેસ્ત્રીક્ષણૈઃ ।
યુક્તામિન્દુનિબદ્ધરત્નમુકુટાં તત્ત્વાર્થવર્ણાત્મિકામ્ ॥

ગાયત્રીં વરદાભયાઙ્કુશકશાં શૂલં કપાલં ગુણૈઃ ।
શઙ્ખં ચક્રમથારવિન્દયુગલં હસ્તૈર્વહન્તીં ભજે ॥

કવચપાઠઃ -
ૐ ૐ ૐ ૐ ભૂઃ ૐ ૐ ભુવઃ ૐ ૐ સ્વઃ ૐ ૐ ત ૐ ૐ ત્સ ૐ
ૐ વિ ૐ ૐ તુ ૐ ૐ ર્વ ૐ ૐ રે ૐ ૐ ણ્યં ૐ ૐ ભ ૐ ૐ ર્ગો ૐ
ૐ દે ૐ ૐ વ ૐ ૐ સ્ય ૐ ૐ ધી ૐ ૐ મ ૐ ૐ હિ ૐ ૐ ધિ ૐ
ૐ યો ૐ ૐ યો ૐ ૐ નઃ ૐ ૐ પ્ર ૐ ૐ ચો ૐ ૐ દ ૐ
ૐ યા ૐ ૐ ત્ ૐ ૐ ।
ૐ ૐ ૐ ૐ ભૂઃ ૐ પાતુ મે મૂલં ચતુર્દલસમન્વિતમ્ ।
ૐ ભુવઃ ૐ પાતુ મે લિઙ્ગં સજ્જલં ષટ્દલાત્મકમ્ ।
ૐ સ્વઃ ૐ પાતુ મે કણ્ઠં સાકાશં દલષોડશમ્ । var સુવઃ
ૐ ત ૐ પાતુ મે રૂપં બ્રાહ્મણં કારણં પરમ્ ।
ૐ ત્સ ૐ બ્રહ્મરસં પાતુ મે સદા મમ ।
ૐ વિ ૐ પાતુ મે ગન્ધં સદા શિશિરસંયુતમ્ ।

ॐ તુ ॐ પાતુ મે સ્પર્શં શરીરસ્ય કારણં પરમ્ ।
ॐ ર્વ ॐ પાતુ મે શબ્દં શબ્દવિગ્રહકારણમ્ ।
ॐ રે ॐ પાતુ મે નિત્યં સદા તત્ત્વશરીરકમ્ ।
ॐ ણ્યં ॐ પાતુ મે અક્ષં સર્વતત્ત્વૈકકારણમ્ ।
ॐ ભ ॐ પાતુ મે શ્રોત્રં શબ્દશ્રવણૈકકારણમ્ ।
ॐ ર્ગો ॐ પાતુ મે ઘ્રાણં ગન્ધોત્પાદાનકારણમ્ ।
ॐ દે ॐ પાતુ મે ચાસ્યં સભાયાં શબ્દરૂપિણીમ્ ।
ॐ વ ॐ પાતુ મે બાહુયુગલં ચ કર્મકારણમ્ ।
ॐ સ્ય ॐ પાતુ મે લિઙ્ગં ષટ્દલયુતમ્ ।
ॐ ધી ॐ પાતુ મે નિત્યં પ્રકૃતિ શબ્દકારણમ્ ।
ॐ મ ॐ પાતુ મે નિત્યં નમો બ્રહ્મસ્વરૂપિણીમ્ ।
ॐ હિ ॐ પાતુ મે બુદ્ધિં પરબ્રહ્મમયં સદા ।
ॐ ધિ ॐ પાતુ મે નિત્યમહઙ્કારં યથા તથા ।
ॐ યો ॐ પાતુ મે નિત્યં જલં સર્વત્ર સર્વદા ।
ॐ યો ॐ પાતુ મે નિત્યં જલં સર્વત્ર સર્વદા ।
ॐ નઃ ॐ પાતુ મે નિત્યં તેજઃપુઞ્જો યથા તથા ।
ॐ પ્ર ॐ પાતુ મે નિત્યમનિલં કાયકારણમ્ ।
ॐ ચો ॐ પાતુ મે નિત્યમાકાશં શિવસન્નિભમ્ ।
ॐ દ ॐ પાતુ મે જિહ્વાં જપયજ્ઞસ્ય કારણમ્ ।
ॐ યાત્ ॐ પાતુ મે નિત્યં શિવં જ્ઞાનમયં સદા ।
ॐ તત્ત્વાનિ પાતુ મે નિત્યં, ગાયત્રી પરદૈવતમ્ ।
કૃષ્ણં મે સતતં પાતુ, બ્રહ્માણિ ભૂર્ભુવઃ સ્વરોમ્ ॥

ॐ ભૂર્ભુવઃ સ્વઃ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ
ધિયો યો નઃ પ્રચોદયાત્ ।
ॐ જાતવેદસે સુનવામ સોમમારાતી યતો નિદહાતિ વેદાઃ ।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા નાવેવં સિન્ધું દુરિતાત્યગ્નિઃ ।
ॐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઊર્વારિકમિવ બન્ધનાત્ મૃત્યોર્મુક્ષીય મામૃતાત્ ॥

ॐ નમસ્તે તુરીયાય સર્શિતાય પદાય પરો રજસેઽસાવદોં મા પ્રાપત ॥

ઇતિ કવચસહિતા ચતુષ્પાદગાયત્રી સમ્પૂર્ણા ॥

Encoded by aspundir Singh

Proofread by PSA Easwaran

*alabhya shrIgAyatrIkavacham*

pdf was typeset on September 18, 2022

Please send corrections to *sanskrit@cheerful.com*